Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# आलङ्कारिकः मम्मटाचार्यदिशा गुणानां विवेचनम्

**नीलमाधव प्रधानः**, भुवनेश्वरम्, ओडिशा

रीतिसम्प्रदायस्य प्रवर्तकः वामनाचारिति सर्वेऽपि ज्ञायते एव। वामनाचार्येण काव्यस्यात्मारूपेण रीतिः एव स्वीकृतः। स्वस्य काव्यालङ्कारसूत्रग्रन्थे वामनाचार्येण रीतिः एव काव्यस्यात्मास्वीकृत्य उक्तं यत् – "रीतिरात्मा काव्यस्य" पुनश्च रीत्याः लक्षणं वामनाचार्येण उक्तं यथा –

**विशिष्टा पदरचना रीतिः विशेषो गुणात्मा।**[1]

अर्थात् पदे विशिष्टता रीतेः कारणात् आयाति। गुणं विना पदं सामान्यं भाति। अतः एतत्सर्वमान्यं भवति यत् रीतिः गुणैराश्रितः काव्यशास्त्रीयतत्त्वं भवति। अतः रीतिसम्प्रदायरेव गुणसम्प्रदायः भवतीति वक्तुं शक्यते। रीतेः प्राचीनः नाम मार्गं इति उच्यते। महाकवि दण्डीः द्वारा स्वीकृतदशगुणं वैदर्भमार्गरूपेण आचार्यैः अभिहितः कृतः।

## मम्मटाचार्यदिशा गुणस्वरूपम्

गुणः काव्ये शोभावर्धकारि अन्तर्निहितधर्मः भवति। गुणविहीनकाव्यस्य कल्पनां कर्तुं नैव शक्यते। अलङ्कारविहिनकाव्यस्य स्वरूपं भवितुमर्हति परन्तु गुणं विना काव्यं नैव सम्भवति। काव्यस्यात्मा रसः भवति परन्तु गुणः एव तस्य रसस्य मुख्यधर्मः भवति। संस्कृतकाव्यशास्त्रीयाचार्याणां द्वारा रसस्य उत्कर्षतायां स्थायीभावान् गुणरूपेण स्वीकृतः वर्तते।

साहित्यशास्त्रजगती गुणस्वरूपं तथा गुणसंख्याश्च सुव्यवस्थितं सर्वेऽपि आचार्यैः कृतम्। किन्तु काव्यगुणः संख्यास्वरूपसन्दर्भे मम्मटाचार्यगणानां मतं भिन्नं दृश्यते। तत्र मम्मटाचार्येण अपि स्वस्य मतं स्थापितं वर्तते। यथा –

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितियोः गुणा।।**[2]

अर्थात् गुणमेव रसस्य धर्मः भवति नित्यश्च भवति, रसस्योत्कर्षं प्रतिपादयति। पुनरुक्तं यत् मम्मटाचार्यः –

**रसस्योत्कर्षापकर्षहेतू गुणदोषौ भक्त्या शब्दार्थयोः।**[3]

गुणानां संख्या सन्दर्भे सर्वैः आचार्यैः स्वस्य मतं प्रकटितवन्तः। तत्र मम्मटाचार्यमपि गुणानां संख्याविषये स्वस्य मतम् उपस्थाप्य वदति यत् – **माधुर्यमोजः प्रसादाख्यास्त्रयस्ते न पुनर्दशः।**[4]

अर्थात् काव्यप्रकाशकारः मम्मटाचार्येण माधुर्य-ओज-प्रसादरूपेण गुणत्रयं स्वीकतम्। एतस्य गुणत्रयस्य व्याख्या मम्मटाचार्यरीत्या क्रियते।

## माधुर्यगुणः

माधुर्यगुणस्य सन्दर्भे मम्मटाचार्येण उक्तम् यत् – **"आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्"**[5] अर्थात् यः चित्तं द्रवीभूतं करोति अपि च शृङ्गारेस्थित्वा आह्लादस्वरूपं प्रकाशयति सः गुणः एव माधुर्यगुणः। अयं माधुर्यगुणः सामान्यरूपेण शृङ्गारे स्थाष्यति। परन्तु एषः करुण-विप्रलम्भ-शान्तरसस्योत्तरोत्तरः चमत्कारं प्रतिपादयति। उक्तं यत् मम्मटाचार्येण –

**करुणे विप्रलम्भे तच्छन्ते चातिशयान्वितम्।**[6]

माधुर्यगुणस्य अभिव्यञ्जकः गुणानां सन्दर्भे मम्मटाचार्यमुक्तं यत् –

**मूर्ध्नि वर्गात्त्यगाः स्वर्शा अटवर्गा रणौलघू। अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।।**[7]

माधुर्यगुणस्य उदाहरणं मम्मटाचार्यः प्रस्तुति –

**अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः। कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्ता पर चिन्तनानि।।**

अर्थात् अनङ्गरङ्गः कामदेवः अस्याः नायिकायाः शरीरे अलौकिकभङ्गिनां रङ्गीकृत्य युवकानां चित्तं शान्तयतीति।

उदाहरणेऽस्मिन् गकारः तथा तकारः स्वकीयवर्गस्य अन्तिमवर्णैः सह युक्तं भवति। अनङ्गः, तदङ्गः, भङ्गीभिः, अङ्गीकृतम् एतेस्मिन् पदे गकारः तथा शान्तः इत्यादौ तकारः स्वकीय वर्गस्य अन्तिमाक्षरैः सह युक्तं भवति। रङ्गादि पदेस्मिन् ह्रस्वस्य व्यवहारः रेफरूपेण भवति। एते सर्वेऽपि वर्णाः माधुर्यस्य व्यञ्जकाः भवन्ति।

## ओजगुणः

ओजगुणस्य सन्दर्भे मम्मटेन उक्तम् यत् – **दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।**[8]

अर्थात् वीररसे स्थित्वा चित्तानां विस्तारे हेतुभूतदीप्तिः ओजः उच्यते। ओजगुणस्य अभिव्यञ्जकः वर्णः तावत् –

**योग आद्यतृतीयाभ्यामन्त्ययोरेण तुल्ययोः। टादि शषौवृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि।।**

मम्मटाचार्यः अत्र ओजगुणस्य उदाहरणं प्रस्तुतं करोति—

**मूर्ध्नामुद्वृत्तकृन्ताविरलगलद्रक्तसंसक्तधाराधौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम्।**

**कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां, दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयासः।।**

अर्थात् औद्धत्यपूर्वकं निरन्तरं शिरछेदनेन कण्ठात् निर्गतः अविच्छिन्नरक्तस्रावयेन शिवस्य चरणाबिन्दम् अभिशिक्तवान्। तत् कृत्वा संसारे विजयं प्राप्य अथवा मे शिरोदानं कैलासाधीपतिं मदिच्छा सूचयितुं गर्वितः भूजानां किम् एतादृशं फलं लब्धं यत् अद्य स्वस्य नगर्याः रक्षार्थं स्वयं प्रयासः कुर्वन् अस्मि। संसारेऽस्मिन् महत्त्वं मे गतः।

प्रस्तुतोऽयं श्लोके दीर्घसमासः शकारः तथा षकारः एवं विकट रचनायाः दृष्ट्या अत्र ओजगुणस्य निष्पत्तिर्जायते।

## प्रसाददगुणः

प्रसादगुणस्य सन्दर्भे मम्मटाचार्येण उक्तं यत् –

**शुष्केन्धाग्निवत् स्वच्छजलवत्ससहसैव यः। व्याप्नोत्यन्यत प्रसादोऽसौ सर्वत्र विहितस्थितिः।।**[9]

अर्थात् शुष्के इन्धनेऽस्मिन् यत् अग्निवत् भवति, स्वच्छजले यत् चित्ते सहजताम् उत्पादयति, तेषु सर्वेषु रसेषु यः तिष्ठति सः एव प्रसादगुणः। प्रसादगुणस्य अभिव्यञ्जकवर्णाः तावत् –

**श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्। साधारणः समग्राणां स प्रसादो गुणः मतः।।**[10]

मम्मटाचार्यस्यानुसारेण प्रसादगुणस्योदाहरणं यथा –

**परिम्लानं पीनस्तनजघनसङ्गादुभयतः, तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।**

**इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः, कृशाङ्ग्याः सन्तापं वदति विसिनीपत्रशयनम्।।**

अर्थात् दीर्घस्तननितम्वयोः सम्पर्केन शिथीलितः मे शरीरम्। अपि च वाह्वभ्यां निर्बलत्वं दृश्यते। तद्वत् विसिनीपत्रे शयनकृशाङ्गी कामिन्या सन्तापं जनयति।

प्रस्तुतोदाहरणेऽस्मिन् श्रवणमात्रेण अर्थस्य प्रतीतिर्जायते। अतः एतत् प्रसादगुणेन युक्तं भवति। एवं रूपेण मम्मटाचार्येण त्रिगुणस्य सम्यक् प्रतिपादनं कृतम्।

## उपसंहारः

अत्र मम्मटाचार्यदिशा यत् गुणाः वर्तन्ते तेषां सर्वेषां गुणानां लक्षणम्, अभिव्यञ्जकवर्णाः, उदाहरणम् इत्यादयस्य सम्यग्रूपेण उपस्थापनं वर्तते। एवं रूपेण सूक्ष्मातिसूक्ष्मं मम्मटाचार्यस्य गुणिविवेचनं स्वीकृत्य सर्वमपि तथ्यं पत्रेऽस्मिन् स्थापितवान् मया।

## पादटिप्पणी

1. का.प्र.८.७६ । 2. का.सू.१.२.७. । 3. का.प्र.८.६६ । 4. का.शा.१.१२ । 5. का.प्र.८.८८ । 6. का.प्र.८.६६ ।
7. का.प्र.८.६९ । 8. का.प्र.८.७४ । 9. का.प्र.८.६९ । 10. का.प्र.८.७६ ।

## संकेताक्षरसूची

का. सू. – काव्यालङ्कारः सूत्रवृत्तिः

का. शा. – काव्यानुशासनम्

का. प्र. - काव्यप्रकाशः

## सहायकग्रन्थसूची

**काव्यालङ्कारसूत्रवृत्तिः** – केदारनाथ शर्मा, चौखम्बा अमरभारती प्रकाशन, वाराणसी ।

**काव्यानुशासनम्** – श्रीहेमचन्द्रः, कृष्णदास अकादमी, वाराणसी ।

**काव्यप्रकाशः** – मम्मटाचार्यः, आचार्यविश्वेश्वर, ज्ञानमण्डलप्रकाशनम्, वाराणसी ।

**काव्यप्रकाशः** – मम्मटाचार्यः, वामनाचार्यः झलकीकरटीका, पूना ।

**Dr. Nilamadhab Pradhan**
Guest Faculty
Department of Sanskrit
Rama Devi Women's University
Vidya Vihar, Bhubaneswar
Odisha-751022
Contact No. : 9140106176
E-mail : nilamadhab2025@gmail.com

**********